# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 (OLD) | प्रश्नपत्रम् – 7 | गुणाः – ५० |
| विषयः – फलितज्योतिषम् | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – २०/०७/२०२१ | सन्दर्भग्रन्थः – सर्वार्थचिन्तामणिः, केरलप्रश्नसङ्ग्रहः | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ जलचरपशुनरकीटा बन्धौ माने तनौ मदे चापि।
क्रमशो भवन्ति वीर्या विगतबलास्तत्सप्तमे वापि॥

२ चन्द्रस्य रक्तं दिनपश्च चास्थि स्नायुः शनेर्धातुवशादुपाधिः।
तद्धातुकोपान्मरणं प्रयाति रंध्रस्थितानामिह खेचराणाम्॥

३ पश्यत्यसौ भानुसुतस्तृतीयं मानं च पूर्णं चरस्त्रमारः।
जीवस्त्रिकोणं मदनं च सर्वे पश्यन्ति दृष्ट्या चरणप्रवृद्ध्या॥

**प्रश्नः २ राजयोगान् वर्णयत।**

**प्रश्नः ३ ग्रहाणां पञ्चधामैत्रीविचारः निरूपयत।**

**प्रश्नः ४ कयोरपि द्वयोः पद्ययोः व्याख्या कार्या।**

१ पापग्रहे सोदरभावयुक्ते सोत्थेथ वा पापनिरीक्षिते स्यात्।
तदीश्वरे पापखगान्तरस्थे सहोदराणां कथयन्ति नाशम्॥

२ शौर्याधिपे भानुयुतेत्र धीरः चन्द्रान्विते मानसधैर्ययुक्तः।
कृष्णो जडो भौमयुते प्रकोपी सौम्यान्विते सात्विकबुद्धियुक्तः॥

३ क्षेत्रे चरे नीचगते विमूढे पापान्तरे पापनिरीक्षिते वा।
पापग्रहक्षेत्रगतेरिगेहे क्षेत्रादिनाशं कथयन्ति तज्ज्ञाः॥

**प्रश्नः ५ उत्तमगृहयोगान् वर्णयत।**

**प्रश्नः ६ सिंहासनप्राप्तियोगान् वर्णयत।**

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः व्याख्या कार्या।**

१ प्राची प्रतीची माहेशी कौबेरी दिक् शुभावहा।

अवाची राक्षसी दुष्टा शून्याग्नेयी च मारुती ॥

२ ऊर्ध्वदृष्ट्या भवेज्जीवो अधो दृष्ट्या च मूलकम् ।
समदृष्ट्या भवेद् धातुः मूलदेवेन भाषितम् ॥

३ पूर्वास्ये धातुचिन्ता स्याज्जीवं दक्षिणे तथा ।
उत्तरास्ये वदेन्मूलं पश्चिमे मिश्रितं फलम् ॥

**प्रश्नः ८ पृच्छकस्य शरीरस्पर्शनेन प्रश्नफलस्य ज्ञानं विलिख्यताम् ।**

**प्रश्नः ९ जय-पराजयप्रश्नफलविचारः विस्तारेण क्रियताम् ।**

**प्रश्नः १० दशानां प्रश्नानामुत्तरं लिखत ।**

१ विक्रमनाथः अर्थात् कस्य भावस्य अधिपः ?
२ रोगस्थानं कतमं स्थानम् ?
३ धरासुतः कः ?
४ केन्द्रस्थानानि कानि ?
५ प्रश्नाः कतिविधाः ?
६ केरलशास्त्रस्य प्रणेता कः ?
७ द्वितीयभावस्य का संज्ञा ?
८ रात्रिबली राशयः के ?
९ मीनराशिः कस्य ग्रहस्य उच्चराशिः ?
१० कस्य राशेः वर्णः रक्तः ?
११ सेनापतिः ग्रहः कः ?
१२ शीतरश्मिः अर्थात् कः ग्रहः ?
१३ अशुभग्रहाः के ?
१४ शुभग्रहाः के ?
१५ सर्वार्थचिन्तामणिः ग्रन्थस्य लेखकः कः ?

****